H.K. S.M. VIVEKANANDA VIDYABHAVAN LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Major 2nd Semester Examination, 2025

## SANDSC202T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### UNIT-I

### [F.M. - 25]

1. अधोलिखितेषु प्रश्नेषु यथेच्छम् ***एकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) किं नाम संवादसूक्तम्? ऋग्वेदस्य संवादसूक्तानि आश्रित्य कश्चन निबन्धो लेख्यः। 2+8

(ख) अथर्ववेदस्य विषयमवलम्ब्य कश्चन निबन्धो लेख्यः।

(ग) 'पुराण'– शब्दस्य कोऽर्थः? लक्षणसहितं विस्तारेण आलोचयत।

2. अधोलिखितेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। तेषु ***एकस्य*** प्रश्नस्य उत्तरं अवश्यमेव संस्कृतभाषया देवनागरीलिप्या च देयम्। 2×5 = 10

(क) वैदिकछन्दः कतिविधम्? कानि च तानि?

(ख) ऋग्वेदस्य ब्राह्मणग्रन्थौ कौ स्तः?

(ग) यजुर्वेदस्य आरण्यकग्रन्थौ कौ स्तः?

(घ) पुराणशब्दस्य कोऽर्थः?

(ङ) पुराणेषु केषां देवानां प्राधान्यं वर्णितम्?

(च) महाभारतस्य त्रयः वक्तारः के सन्ति?

(छ) अयोध्यायाः राजधानी का भवति?

(ज) सात्त्विकपुराणानि कानि?

3. अधोलिखितेषु ***विषयमेकमाश्रित्य*** संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत — 5×1 = 5

(क) श्रीमद्भगवद्गीता।

(ख) आश्वलायनः।

(ग) विष्णुपुराणम्।

(घ) ऐतरेयब्राह्मणम्।

## UNIT-II

**[F.M. - 15]**

4. अधोलिखितेषु यथेच्छं ***त्रयमाश्रित्य*** संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत — 5×3 = 15

(क) भासः।

(ख) उत्तररामचरितम्।

(ग) विशाखदत्तः।

(घ) वेणीसंहारम्।

(ङ) भारविः।

(च) हितोपदेशः।

## UNIT-III

**[F.M. - 10]**

5. अधोलिखितेषु यथाभिमतं ***विषयद्वयमाश्रित्य*** संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत — 5×2 = 10

(क) महाभाष्यम्

(ख) कणादः

(ग) रीतिप्रस्थानम्

(घ) आर्यभट्टः।

——×——

R.K. S.M. VIVEKANANDA VIDYABHAVAN LIBRARY

RK. S.M. VIVEKANANDA VIDYABHAVAN * LIBRARY *

**WEST BENGAL STATE UNIVERSITY**
B.A. Major 4th Semester Examination, 2025

# SANDSC404T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours                                                                                    Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## UNIT-I

1. स्वप्नवासवदत्तमिति नाटके प्रथमांकमनुसृत्य ब्रह्मचारिणः वृत्तान्तं सविशदं लिख। 10

**अथवा**

स्वप्नवासवदत्तमिति नाटके स्वप्नदृश्यस्य आलोकेन नाटकस्य नामकरणस्य याथार्थ्यमालोच्यताम्।

2. अधोलिखितानां यथेच्छं ***पञ्च*** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या समाधेयाः। 2×5 = 10

(क) वासवदत्ता केन कुत्र न्यासरूपेण निक्षिप्ता ?

(ख) का आसीत् पद्मावती ? तस्या पितुर्नाम किम् ?

(ग) चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः – कः कमुद्दिश्य एवमुक्तवान् ?

(घ) राज्ञः उदयनस्य द्वयोः मन्त्रिणोः नाम लिख्यताम्।

(ङ) का आसीद् घोषवती ? सा कुत्र प्राप्ता ?

(च) वासवदत्तायाः पितरौ कौ आस्ताम् ?

(छ) स्वप्नवासवदत्तमिति नाटकं केन विरचितम् ? तस्य अपरं नाटकमेकं नाम्ना उल्लिख्यताम्।

3. संस्कृतभाषया देवनागरीलिप्या च ***कस्यचिदेकस्य*** श्लोकस्य व्याख्या कार्या — 5

(क) <u>कालक्रमेण</u> जगतः परिवर्त्तमाना।
चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः॥

(ख) नैवेदानीं तादृशाश्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ता।
धन्या सा स्त्री यां तथा वेत्ति भर्त्ता <u>भर्त्तृस्नेहात्</u> सा दग्धाप्यदग्धा॥

4. अधोलिखितानां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च लेख्यम्।

(क) प्रकृतिप्रत्ययौ निरूप्येताम् — परिवर्त्तमाना (3 क) अथवा, वेत्ति (3 ख) 1

(ख) रेखाङ्कितपदे सकारण विभक्तिः प्रदर्श्यताम् — <u>कालक्रमेण</u> (3 क) अथवा, <u>भर्त्तृस्नेहात्</u> (3 ख) 2

(ग) व्यासवाक्येन सह समासः कार्यः — भाग्यपंक्तिः (3 क) अथवा, भर्तृस्नेहात् (3 ख) 2

## UNIT-II

5. रघुवंशमिति महाकाव्यस्य प्रथमसर्गमवलम्ब्य सपत्नीकस्य दिलीपस्य वसिष्ठाश्रमयात्रा संस्कृतभाषया देवनागरीलिप्या च सविशदं वर्णनीया।

**अथवा**

"उपमा कालिदासस्य" — वाक्यस्यास्य तात्पर्यं संस्कृतभाषया देवनागरीलिप्या च सोदाहरणं व्याख्यायताम्।

6. संस्कृतभाषया देवनागरीलिप्या च ***कस्यचिदेकस्य*** श्लोकस्य व्याख्या कार्या —

(क) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

(ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

7. अधोलिखितानां प्रश्नानामुत्तरं सुरगिरा देवनागरलिप्या च लेखनीयम्।

(क) प्रकृतिप्रत्ययौ निरूप्येताम् — तितीर्षुः (6 क) अथवा, त्यागे (6 ख)

(ख) रेखाङ्कितस्य पदस्य सकारणविभक्तिः दर्शयताम् — मोहात् (6 क) अथवा, शक्तौ (6 ख)

(ग) सविग्रहः समासः निर्णयः — सूर्यप्रभवः (6 क), अथवा, सप्रसवा (6 ख)

——×——

R.K. S.M. VIVEKANANDA VIDYABHAVAN ★ LIBRARY ★

R.K. S.M. VIVEKANANDA VIDYABHAVAN • LIBRARY •

**WEST BENGAL STATE UNIVERSITY**
B.A. Major 4th Semester Examination, 2025

# SANDSC405T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## UNIT-I

1. ***यथाभिमतमेकस्य*** प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) शकुन्तलां प्रति दर्वाससः शापः कः आसीत् ? 'अभिज्ञानशकुन्तलम्' इति नाटकस्य क्रमविकाशे तस्य शापस्य उपयोगिता प्रदर्श्यताम्। 10

(ख) 'उपमा कालिदासस्य इत्युक्तिः अभिज्ञानशकुन्तलमाश्रित्य सोदाहरणम् विवेचनीया।

2. ***कस्यचिदेकस्य*** श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत — 5

(क) इदं किलाव्याजमनोहरं वपुस्तपः क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

(ख) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

3. अधोलिखितेषु ***पञ्च*** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः — 2×5 = 10

(क) 'अभिज्ञान'शब्दस्य कोऽर्थः ? अभिज्ञानशकुन्तलनाटके किम् अभिज्ञानरूपेण व्यवहृतम् ?

(ख) "आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः" — कस्य उक्तिरियम् ? कदा कमुद्दिश्य इदमुक्तम् ?

(ग) शकुन्तलायाः पित्रोः नाम किम् ? तस्याः प्रियसखीद्वयस्य नाम किम् ?

(घ) 'पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि' — कं प्रति कदा केन उक्तम् ?

(ङ) दुष्यन्तस्य पुत्रस्य नाम किम् ? कुत्र कथम् दुष्यन्तेन सह सपुत्रायाः शकुन्तलायाः मेलनं सङ्घटितम् ?

(च) का सानुमती ? सा कथम् राजोद्यानं प्रविशति स्म ?

(छ) कः मातलिः ? सः दुष्यन्ताय कीदृश्याः वार्तायाः ज्ञापनार्थमुपनीतोऽभवत् ?

4. (क) संस्कृतभाषया देवनागरीलिप्या च सविग्रहः समासः करणीयः। 2

'नीलोत्पलपत्रधारया' अथवा 'परिकल्पितसत्त्वयोगा'।

(ख) अधोलिखितेषु ***शब्दत्रयस्य*** संस्कृतभाषया देवनागरीलिप्या च प्रकृतिप्रत्ययनिर्णयः करणीयः। 3

साधयितुम् (2 क), निवेश्य (2 ख), अनुचिन्त्य (2 ख), व्यवस्यति (2 क), प्रतिभाति (2 ख)

## UNIT-II

5. यथाविहितं ***कस्यचिदेकस्य*** प्रश्नस्योत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्। 10×1 = 10

(क) महाकविवाणभट्टेन विरचितायाः कादम्बर्य्याः शुकनासोपदेशमनुसृत्य लक्ष्म्याः चरित्रं निरूप्यताम्।

(ख) 'बाणोच्छिष्टं जगत् सर्वम्' — अस्योक्तेः यथार्थता निरूप्यताम्।

6. भवादृशा एव भवन्ति भाजनानि उपदेशानाम् । अपगतमले हि मनसि स्फटिकमणाविव, रजनिकरगभस्तयो विशन्ति सुखेन उपदेशगुणाः । गुरुवचनमलमपि सलिलमिव महदुपजनयति श्रवणस्तितं शूलमभव्यस्य। इतरस्य तु करिण इव शृङ्भरणमाननशोभासमुदयमधिकतरमुपजनयति।

(क) 'अपगतमले' — इत्यस्य संस्कृतभाषया देवनागरीलिप्या च सविग्रहः समासः करणीयः। 2

(ख) 'विशन्ति' — इत्यत्र संस्कृतभाषया देवनागरीलिप्या च प्रकृतिप्रत्ययौ निर्णेयौ। 1

(ग) 'सुखेन' — इत्यत्र संस्कृतभाषया देवनागरीलिप्या च ससूत्रं सकारणविभक्तिः निर्णेया। 2

7. अधोलिखितेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत — 5

(क) गन्धर्वनगरलेखा

(ख) सप्तद्वीपा

(ग) महापातकम्।

——×——

RK. S.M. VIVEKANANDA VIDYABHAVAN * LIBRARY *

R.K. S.M. VIVEKANANDA VIDYABHAVAN * LIBRARY *

WEST BENGAL STATE UNIVERSITY

B.A. Major 4th Semester Examination, 2025

# SANDSC406T-SANSKRIT (MAJOR)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## UNIT-I
## Marks-20

1. अधोलिखितयोः प्रश्नयोः संस्कृतभाषया देवनागरीलिप्या च ***कस्यचिदेकस्योत्तरं*** प्रदेयम्। 10×1 = 10

(क) 'दण्डिनः पदलालित्यमि'ति विद्वद्वचनतात्पर्य्यं वेशदयेन विवृणुत।

(ख) 'राजवाहनचरितम्' इति गद्यकाव्ये राजवाहनस्य चरित्रं वर्णनीयम्।

2. ***कस्यचिदेकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याख्यां लिखतु। 5×1 = 5

(क) स्मर तस्या हंसगामिनि ! हंसकथायाः।

(ख) दयित ! त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिः । अद्य मे मनसि तमोपहस्त्वया दत्तो ज्ञानप्रदीपः । पक्वमीदानीं त्वत्पादपद्मपरिचर्य्याफलम्।

3. (क) ***यथेच्छमेकपदस्य*** सन्धिविच्छेदः समाधेयः। 1×1 = 1

तमोपहस्त्वया - 2 (ख), त्वत्प्रसादादद्य - 2 (ख)

(ख) अधोलिखितेषु यथेच्छं ***एकस्य*** सविग्रहः समासः निर्णेयः। 2×1 = 2

हंसकथायाः - 2 (क), ज्ञानप्रदीपः - 2 (ख)

(ग) अधोलिखितेषु यथेच्छं ***पदद्वयस्य*** प्रकृतिप्रत्ययौ निर्णेयौ। 1×2 =2

स्मर - 2 (क), दत्तः- 2 (ख), पक्वम् - 2 (ख), हंसगामिनि - 2 (क)

## UNIT-II
## Marks-30

4. यथाभिमतं प्रश्नस्य ***एकस्योत्तरं*** संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्। 10×1 = 10

(क) 'भारवेरर्थगौरवम्' — इति वाक्यं सोदाहरणं विचारयतु।

(ख) किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गे युधिष्ठिरं प्रति वनेचरस्य उक्तेः सारं लिखतु।

5. **यथेच्छमेकस्य** श्लोकस्य संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या । 5×

(क) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः ॥

(ख) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥

6. अधोलिखितेषु **पञ्चप्रश्नाः** संस्कृतेन देवनागरीलिप्या च समाधेयाः । 2×5 = 1

(क) 'किरातार्जुनीयम्' इति कीदृशी रचना ? अस्य रचयिता कः ?

(ख) युधिष्ठिरः वनेचरं कुत्र किमर्थं प्रेरयति स्म ?

(ग) किरातार्जुनीयम् इति महाकाव्यस्य प्रसिद्धः टीकाकारः कः ? किं तट्टीकायाः नाम ?

(घ) अरिषड्वर्गस्य नामानि लिखत ।

(ङ) वृकोदरः कः ? कथं स वृकोदरः इति उच्यते ?

(च) किंसखा किम्प्रभुः चेति पदद्वयस्य कोऽर्थः ?

(छ) दुर्योधनः कथम् यन्त्रणाकातरः सन् नतमस्तकोऽभवत् ?

7. (क) **यथेच्छमेकपदस्य** सन्धिविच्छेदः समाधेयः । 1×1 = 1

नृपेष्वमात्येषु - 5 (क), अतोऽर्हसि - 5 (ख)

(ख) **यथेच्छमेकपदस्य** सविग्रहः समासः निर्णेयः । 2×1 = 2

किंसखा - 5 (क), चारचक्षुषः - 5 (ख)

(ग) यथेच्छं **पदद्वयस्य** प्रकृतिप्रत्ययौ निर्णेयौ । 1×2 = 2

शास्ति - 5 (क), क्षन्तुम् - 5 (ख), कुर्वते - 5 (क), वञ्चनीयाः - 5 (ख)

——×——

R.K. S.M. VIVEKANANDA VIDYABHAVAN * LIBRARY *

R.K. S.M. VIVEKANANDA VIDYABHAVAN LIBRARY

समर्थं विज्ञानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Major 4th Semester Examination, 2025

## SANDSC407T-SANSKRIT (MAJOR)

### DHARMA-SHASTRA

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### UNIT-I

### Marks-20

1. ***यथेच्छमेकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) मनुसंहितायां राज्ञः समुत्पत्तिः यथा वर्णिता तथा वैशद्येन लिख्यताम्।

(ख) किं नाम व्यसनम् ? तच्च कतिविधम् ? मनुसंहितायां व्यसनानि यथा वर्णितानि तथा समासेन वर्ण्यताम्।

2. ***यथेच्छमेकः*** श्लोकः संस्कृतभाषया देवनागरीलिप्या च व्याख्येयः। 5×1 = 5

(क) दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः॥

(ख) दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम्।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम्॥

3. ***यथेच्छमेकं*** विषयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) जांगलो देशः।

(ख) धन्वदुर्गम्।

(ग) आन्वीक्षिकी।

### UNIT-II

### Marks-15

4. यथेच्छं **पञ्च** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) याज्ञवल्क्यसंहितायां कति अध्यायाः सन्ति ? तेषां नामानि लिखत।

(ख) को नाम व्यवहारविषयः ?

(ग) आचार्ययाज्ञवल्क्यनये स्मृत्योर्विरोधे कः बलवान् भवति ? किं तत्र कारणम् ?

(घ) किं नाम प्रमाणम् ? मानुषं प्रमाणं कतिविधम् ?

(ङ) को नाम आधिः ? कश्च प्रतिग्रहः ?

(च) याज्ञवल्क्यनये केषु व्यवहारो न सिद्ध्यति ?

(छ) सबन्धके ऋणे कीदृशी बृद्धिर्भवति ?

5. ***यथेच्छमेकं*** विषयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) याज्ञवल्क्यसंहिता।

(ख) असाधारणव्यवहारः।

(ग) ऋणादानम्।

## UNIT-III

## Marks-15

6. यथेच्छं ***पञ्च*** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) कौटिल्यनये कति विद्याः ? तासां नामानि लिखत।

(ख) का नाम आन्वीक्षिकी ?

(ग) कौटिल्यनये ब्राह्मणस्य स्वधर्मः कः ?

(घ) कौटिल्यनये सर्वेषां वर्णानाम् आश्रमानां च कः स्वधर्मः ?

(ङ) कौटिल्यनये को नाम दण्डः ?

(च) भरद्वाजमते केषाम् अमात्यरूपेण नियोगः कर्तव्यः ? किं च तत्र कारणम् ?

(छ) कौटिल्यमते कथम् अर्थ एव प्रधानः ?

7. ***यथेच्छमेकं*** विषयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) अरिषड्वर्गः।

(ख) त्रिवर्गः।

(ग) इन्द्रियजयः।

——×——

R.K. S.M. VIVEKANANDA VIDYABHAVAN * LIBRARY *